Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 6 | ISSN : 2581- 6306

# विवाहमुहूर्तनिर्णयविचार:

दयानन्द ए आर्
शोधच्छात्र:, जयपुर परिसर:,
केन्द्रियसंस्कृतविश्वविद्यालय:, न्यू दिल्ली,भारत।



**Article Info**
Volume 3, Issue 6
Page Number: 44-54
Publication Issue :
November-December-2020

**Article History**
Accepted : 01 Dec 2020
Published : 10 Dec 2020

## ABSTRACT

**शोधसार:–** काल: शुभक्रियायोग्यो मुहूर्त: इत्यर्थेन प्रवृत्तमिदं शास्त्रं मानवजीवने बहुमिख्यस्थानमाप्नोति। यत: अस्मादेव शास्त्रसहायात् सर्वे गर्भादानादि संस्कारा: प्रवर्तन्ते। तत्र च षोडशसंस्कारेषु बहुमुख्यतम: संस्कार: विवाहाख्य: लोके प्राधान्यं भजते। लोका: एवं सर्वाश्रमाणां मूलत्वात् विवाहाख्यस्यास्य संस्कारस्य अनुष्ठानम् अत्यन्तं श्रोष्ठसमये कर्तव्यमिति लोकसिद्धम् । स च समय: सर्वविधवेधवर्जित: सन् शुभफलद: स्यात्। तस्मात् दैवज्ञेन समयस्यास्य निर्णयार्थं (कालनिर्णयार्थं) बहवो विषया: परिशीलनीया: भवन्ति। अयनर्तुमासपक्षतिथिवारनक्षत्राणां परिशीलनपुरस्सरं पश्चात् च लग्नादीनां विषयामाम् अर्थात् लग्न–लग्नेश–भावशुद्धि–भावप–भावकारक–भावस्थ–तद्दृष्ट–ग्रहाणां शुभाशुभत्वपरिशीलनपुरस्सरं च करणीयमिति बुधमतम्। तस्य च ज्ञानं बहुभि: संहिताग्रन्थै: उपपादितमस्ति अस्माकम् ऋषिभि:पूर्वजै:। तेषां च ग्रन्थानां परिशीलनेन नवीनै: मुहूर्तज्ञै: मुहूर्तग्रन्था: काले काले देशे देशे च आचार–विचाराङ्गभेदेन विरचिता: सन्ति। तेषां च अध्ययनपुरस्सरं विवाहमुहूर्तनिर्णयविचाराख्य: अयं शोधप्रबन्ध: जिज्ञासूनाम् उपयोगाय जिज्ञासोपशमाय च लिखित: अस्ति। अस्य च शोधप्रबन्धस्य आमूलाध्ययनेन विवाहमुहूर्तनिर्णय: कथं करणीय: इत्यस्य प्रथमिकं ज्ञानं संभवति। एवमेव शास्त्रस्य अस्य गहनत्वमपि इति मे निश्चिता मति:। शोधप्रबन्धोऽयं नूनं लोकोपयोगाय भवतु इत्याशासे।

**मुख्यशब्दा:** – ज्यौतिषम्, संहिता, मुहूर्त:, ग्रहा:, वेध:, नक्षत्रं, वेधभङ्ग:, लत्ता, लत्तादोष:, भावशुद्धि:, लग्नशुद्धि:, सप्तमभाव:, पुत्रभाव:, सूर्यसङ्गमदोष:, पङ्गु–अन्ध काण– बधिरदोषा:, नवांशा:, नवांशनिशेध:, योगा:, लग्नभङ्गयोगा:, लग्ने बर्ज्यग्रहा:, अष्टमभाव:, सप्तमशुद्धिविचार:, गुरुदोषविचार:, लग्नभङ्गकर्तरिदोष:, अपवादा:, परिहार:।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**भूमिका**

**"चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः"[1]।**

**"द्वितीयमायुषो भागं कृतदारो गृहे वसेत्"[2]।**

**"त्रयाणामाश्रमाणां तु गृहस्थो योनिरुच्यते"[3]।**

**"यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः।**

**तथा गृहाश्रमं प्रप्य सर्वे जीवन्ति चाश्रमाः"[4]॥**

**गृहवासो सुखार्थो हि पत्नीमूलं च तत्सुखम्[5]**

इत्यादिभिः शास्त्रवाक्यैः पुनः च **न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। गृहस्थः स तु विज्ञेयो गृहे यस्य पतिव्रता।** इत्यादिभिः सूक्तिभिः च इदमत्र स्फुटं यत् सर्वाश्रमाणां मूलं सर्वसुखस्य च मूलं गृहस्थाश्रमः एव इति। स च गृहस्थाश्रमः धर्मार्थकामदायकः आराच्च अपवर्गख्यमोक्षदायकः अपीति समेषामास्तिकानां सम्मतिः। अयं च सर्वाश्रमाणां मूलत्वात् सर्वैः सम्यगनुष्ठेयः गृहस्थाश्रमः। यतः अयं वधू-वरयोः एकः पवित्रसम्बन्धः सर्वान् लोकान् उद्धरति। अत एव अग्निमुखेनैव अस्य गृहस्थाश्रमस्य अनुष्ठानं क्रियते। अत्यन्तं पवित्रत्वात् अस्य अनुष्ठानमपि अत्यन्तपवित्रकाले एव कर्तव्यमिति सर्वसम्मतिः दृश्यते। तमेव पवित्रं कालं वयं कालज्ञाः दैवज्ञाः सांवतसराः मुहूर्त इति व्याख्यास्यामः।

**कालः शुभक्रियायोग्यो मुहूर्तः**[6] इत्याख्यवचनेन समनुष्ठीमानानां समेषां शुभकर्मणां कृते मुहूर्तः सर्वतोभावेन प्राधान्यं भजते । लोकाः शुभकर्मचिकीर्षवः, तेभ्यः तदुचितकालकथनेन उपकर्तुं शास्त्रमिदं प्रवृत्तमस्ति।

गतः शुभाशुभफलनिरूपणे प्रवृत्तेऽस्मिन् ज्योतिषशास्त्रे मुहूर्तस्य आवश्यकता सर्वत्र सार्वकालिकरूपेण सार्वदेशिकरूपेण च दरीदृश्यते।

अत्र क्रिया शब्देन जातकर्म-नामकरणादि समूहः ग्राह्यः। सेयं क्रिया अमुकस्मिन् शुभदिने कार्या एतस्मिन्नशुभदिने न कार्या इति मुहूर्तशास्त्रे मुहूर्तज्ञैः निर्णयः क्रियते। अत एव मुहूर्तशस्यार्थः शुभक्रियाणाम् अनुष्ठानयोग्यकालः इत्युक्तः। इमं मुहूर्तमधिकृत्य नारदेन प्रोक्तं - **जगति शुभाशुभनिमित्तरूपकालः** इति । अथवा **अन्हः पञ्चदशो भागो मुहूर्तस्तारकामयः। पञ्चदशोक्तास्ते रत्रौ चापि तथा स्मृताः**[7] इत्युक्तम् । अत्र लक्षणया मुहूर्तोपलक्षतः कालः मुहूर्तशब्देन विवक्ष्यते ।तस्मात् दिनस्य नाडिकाद्वयं मुहूर्तनाम्ना व्यवह्रियते।

---

1 महाभारतम्-14.45.13

2 मनुस्मृतिः-2.48

3 दक्षस्मृतिः-2.48

4 वसिष्ठस्मृतिः - 8.16

5 दक्षस्मृति-4

6 मुहूर्तमाधवीये-1.20,

7 मुहूर्तमाधवीये- 4.9

**विषयप्रवेश: विवाहमाहात्म्यं च**

**भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः।**

**तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगता सुतशीलधर्माः॥**[8]

इत्यतः विवाहोऽपि अस्मिन् एव शुभमुहूर्ते कर्तव्यः इति सिद्धः। अत इदानीं तस्य च विवाहस्य कः शुभः कालः कः च अशुभकालः इति विमृश्यते अस्मिन् शोधप्रबन्धे परम्परागत–ग्रन्थानां साहाय्येन।

तत्रादौ विवाहनिर्णयार्थं वधू–वरयोः जातक[9]माश्रित्य जातकमेलापनं कृत्वा अनयोः विवाहमेलापनं भवति वा न वा इति विचार्यते बुधैः । स च क्रमः मेलापनक्रमत्वेन लोके दरीदृश्यते। सिद्धे सति मेलापने विवाहदिननिर्णयः करणीयो भवति। तत्र च आदौ –

**वधू-वरयोः विवाहसमयः, वर्षमासनिर्णयः च**

**स्त्रीणामष्टवर्षतस्त्रिषु नृणां तीर्णव्रतानामयुक्ष्वब्देष्वत्र च राधमाघयुगयोर्मार्गे विवाहःशुभः।**

**ज्येष्ठं पर्वजयोस्त्यजेद्धिमरुचिं ज्ञेज्योननखेटान्वितं यन्मासादि जनुर्भवं प्रथमके गर्भे त्यजेन्नानुजे॥**[10]

इत्यनेन स्त्रीणाम् अष्ट–वर्षतः त्रिषु वर्षेषु शुभः स्यादिति उच्यते । यदि कदाचित् वरस्य अलाभः तर्हि तस्याः विवाहः समवर्षेषु द्वादश–चतुर्दश–षोडशेत्यादिषु कर्तव्य इति सिद्धन्तः। अथ च पुंसां विवाहः अयुग्मेषु अर्थात् विषमेषु अब्देषु शुभः इति व्याख्यातः। तत्रापि विषमेषु अब्देषु राधमाघयुगयोः अर्थात् राधः वैशाखः, माघः प्रसिद्धः अनयोः युगले अर्थात् वैशाखज्येष्ठौ, माघफाल्गुनौ मार्गशीर्षः इति मासाः शुभाः इति कथितम् । एते पञ्चमासाः बहुसम्मताः । एषु च ज्येष्ठमासं प्रथमजातयोः वधू–वरयोः त्यजेत् । अर्थात् एकतरे ज्येष्ठे सति न त्यजेत् इत्यर्थः। अन्यच्च दोषान्तमाह हिमरुचिं चन्द्रं ज्ञेज्योनखेटान्वितं बुधगुरुरहित–अन्यग्रहयुक्तं प्रापग्रहयुक्तं त्यजेत् इत्यर्थः सिद्धः भवति ।

**विवाहे ग्राह्य-त्याज्यनक्षत्राणि तथा वेधाविचारः**

**मूलान्यर्कमघास्थिरेन्द्वनिलयुङ्मैत्रं विवाहे शुभं**

**पापत्यक्तमनिन्दुभुक्खलयुतं भोग्यं च विद्धं च भम्।**

**विश्वेन्द्वोर्यममित्रयोर्द्विकभयोः पैत्रर्क्षहर्योर्मिथो**

**ऽन्त्यर्यम्णोः पुनरस्त्रपोर्वरुणभ्सान्त्योरुभाहस्तयोः॥**[11]

अत्र च विवाहार्थं मूल–रेवती–हस्त–मघा–रेहिणी–उत्तरात्रय–मृगशिरा–स्वाती–अनुराधाः इति नक्षत्राणि शुभानि भवन्ति । एषु च उक्तनक्षत्रेषु पापग्रहयुक्तं, चन्द्रभुक्तिरहितं नक्षत्रं न शुभमिति मन्तव्यम् । एवमेव पापग्रहयुक्तं भोग्यविद्धमपि नक्षत्रं न शुभं स्यात्। अत्र वेधाः तावत् उत्तरामृगयोः भरण्यनुराधयोः रोहिण्यभिजितोः मघा–श्रवणयोः मिथः परस्परं रेवत्युत्तरफल्गुन्योः पुनर्वसुमूलयोः शतभिषक्स्वात्योः उत्तराभाद्रपदहस्तयोः वेधः स्यादिति अर्थः

---

[8] मुहूर्तचिन्तामणौ–6.1

[9] जन्मकुण्डलीम्

[10] मुहूर्तमार्तण्ड– 4.13

[11] मुहूर्तमार्तण्डे– 4.14

निष्पन्न:। अर्थात् यन्नक्षं पापग्रहयुक्तं किन्तु चन्द्रेण अभुक्तं, पापग्रहयुक्तं, यस्मिन्नक्षत्रे पापाग्रहागमः भवति तन्नक्षत्रं न शुभमिति फलितार्थ:।

अयमेव विषयः मुहूर्तमाधवीये समानः दृश्यते –

**ज्योति:शास्त्रविशारदैर्निगदिताः पाणिग्रहे रोहिणी**

**स्वातीपौष्णविशेशनैर्ऋतमघासावित्रमित्रोत्तराः।**

**देशाचारबलेन नैर्ऋतमघे केचिद्विदुर्मध्यमे**

**स्त्रीजन्मत्रयमाहुरत्र शुभदं पुंवत्परास्तारकाः॥**[12]

रोहिणी स्वाती रेवती मृगशिरा मूला मघा हस्तः अनूराधा उत्तरात्रयम्[13] इति एकादश नक्षत्राणि शस्तानि विवाहे इति माधवानुमतिः अपि दृश्यते ।

वेधोऽयं करपीडने निगदितो नान्येषु तेषु स्मृत:[14]

इत्युक्तत्वात् अयं वेधविचारः केवलं विवाहे एव करणीयः न अन्येषु उपनयनादि कर्मसु ।

**वेधभङ्ग-लत्तादोषविचारः**

**लग्नेशे भवगेथवा शशिनि सदृष्टे शुभे वाङ्गगे**

**होरायां च शुभस्य वा व्यधभयं नास्तीति पूर्वे जगुः।**

**भौमात्र्याकृतिषड्जिनाष्टनखभं हंन्त्यग्रतो लत्तया**

**खेटोर्कोर्कमितं शशी मुनिमितं पूर्णो न सम्मालवे॥**[15]

यदि विवाहलग्नस्वामी एकादशगः स्यात् तर्हि वेधदोषो नास्ति । विवाहलग्नं यदि शशिदृष्टं स्यात् तर्हि वेधदोषो नास्ति । चन्द्रातिरिक्ते शुभग्रहे लग्नस्थिते वेधदोषो नास्ति । विवाहलग्ने कस्यचित् शुभग्रहस्य होरा स्यात् तर्हि वेधदोषो नास्तीति मतम् अनुमतं मुनिभिः।

लत्तादोषविचारः – कुजः यस्मिन् नक्षत्रे भवति तस्मात् तृतीयं नक्षत्रं लत्तयति । यदि तत् लत्तितं नक्षत्रं वैवाहिकं स्यात् तर्हि लत्तादोषः इति ग्राह्यते । एवमेव बुधः द्वाविंशतिकं नक्षत्रं, गुरुः षष्ठं नक्षत्रं, शुक्रः चतुर्विंशतिकं नक्षत्रं, शनिः अष्टमं नक्षत्रं, राहुः पृष्टे विद्यमानं विंशतितमं नक्षत्रं, सूर्यः द्वादशं नक्षत्रं, पूर्णचन्द्रः सप्तमं नक्षत्रं लत्तयति। इत्येवं लत्तादोषविचारः।

**सर्वेषां ग्रहाणां लग्नास्थानात् शुभस्थानानि**

---

[12] मुहूर्तमाधवीये- 8.34

[13] उत्तरफल्गुनी, उत्तराषाढा, उत्तराभाद्रा

[14] मुहूर्तमार्तण्डे- 4.15

[15] मुहूर्तमार्तण्डे- 4.16

**अष्टासु शुक्रो नवसु ज्ञजीवौ त्रिष्वर्कभूमौ त्रिषु चामृतांशुः।**

**चतुर्षु सूर्यात्मजसैंहिकेयौ स्थानेश्वभीष्टाः कथिता विवाहे॥**[16]

विवाहे शुक्रः लग्नात् **1, 2, 3, 4, 5, 6, 7, 8, 9, 10, 11** इत्येतेषु भावेषु शुभदः प्रकीर्तितः। रविकुजौ **3,7,11** इत्येतेषु भावेषु शुभदौ प्रकीर्तितौ। एवमेव चन्द्रः **3, 7, 11** स्थानेषु शुभदः प्रकीर्तितः। शनिराहू **3, 7, 8, 11** इत्येतेषु स्थानेषु शुभदौ प्रकीर्तितौ।

**भर्तृस्नेहवतीं प्रभूतविभवां प्रीतां च बन्धुप्रियां**

**पुत्राढ्यां जितशात्रवां विरहिणीमल्पायुषां सुव्रताम्।**

**स्वाचारां सधनां विहीनविभवां कुर्वन्ति कन्यां क्रमात्**

**उद्वाहे वपुरादि राशिषु शुभाः षष्ठे कविर्वैरिणीम्॥**[17]

विवाहे बुध-गुरु-शुक्राः शुभग्रहाः वपुरादि राशिषु क्रमात् कन्यां भर्तृस्नेहवतीं, प्रभूतविभावां, प्रीतां बन्धुप्रियां पुत्राढ्यां जितशात्रवां विरहिणीम् अल्पायुषां सुव्रताम्, स्वाचारां सधनां विहीनविभवां कुर्वन्ति।

**लग्नात् पापग्रहाणां फलानि**

**मृत्युं निर्धनतां श्रियं सुखसुहृद्भङ्गं तनूजक्षयं**

**वृद्धिं शतृजयेन भतृमरणं रोगं च धर्मच्युतिम्।**

**दौःशील्यं विभवं व्ययं च भवनेष्वात्मादिषूग्रग्रहाः**

**कुर्वन्ति क्रमशस्तमोऽर्कतनयावारोग्यमत्राष्टमे॥**[18]

उग्रग्रहाः आत्मादिषु भवनेषु लग्ने मरणं द्वितीये निर्धनतां तृतीये ऐश्वर्यं चतुर्थे सुखबन्धुहानिं पञ्चमे अपत्यक्षयं पष्ठे शत्रुजयधनं सप्तमे पतिमरणम् अष्टमे रोगं नवमे धर्मच्युतिं दशमे दुःशीलताम् एकादशे धनसंपत्तिं द्वादशे व्ययं कुर्वन्ति। अत्र तमोऽर्कतनयौ अर्थात् राहुशनी अष्टमे स्थाने आरोग्यदायकौ भवतः।

चन्द्रस्य विशिष्यभावाः

**लग्ने वधूं हतधवां विसुतां तनूजे कन्यप्रजां च नवमे दशमे भुजिष्याम्।**

**चन्द्रः करोति भृगुपुत्रवद्धनस्य राशौ तद्वान्धवक्षयदम्बुनि कैश्चिदुक्तः॥**[19]

चन्द्रः लग्ने विधवां पञ्चमे सुतरहितां नवमे कन्यप्रजां दशमे दासीं करोति। यदि चन्द्रः अन्येषु स्थानेषु स्यात् तर्हि शुक्रवत् फलं ददाति। कैश्चित् चतुर्थे बान्धवक्षयकारी इति प्रदिष्ट अस्ति।

**चन्द्रस्य पापदृष्टिविचारः पप्तमभावे ग्रहाणां फलानि**

---

[16] मुहूर्तमाधवीये- 8.36

[17] मुहूर्तमाधवीये- 8.37

[18] मुहूर्तमाधवीये- 8.38

[19] मुहूर्तमाधवीये- 8.39

**इन्दोः कामे दशशतकरे वल्लभोनोज्झिता स्यात्**

**तस्मिन्वध्वादयितमरणं भूमिपुत्रो विधत्ते।**

**वीर्योपेतौ रविजशशिजौ प्रेयसो दुर्लभत्वं**

**पापाचारा युवतिरशुभैर्दुष्ट- इन्दौ युते वा॥**[20]

चन्द्रात् सप्तमे यदि सूर्यो भवति तर्हि सा युवतिः पतित्यक्ता भवति। तस्मिन्नेव स्थाने यदि कुजः स्यात् तर्हि पतिमरणं स्यात्। यदि चन्द्रात् सप्तमे वीर्योपेतौ रविजशशिजौ भवतः अर्थात् शनिबुधौ भवतः तर्हि पतिः व्याधिभिः पीडितः भवति। यदि चन्द्रः अशुभैः पापग्रहैः युक्तः दृष्टः स्यात् तर्हि सा युवतिः पापकर्मरता भवति इति । तस्मात् विवाहलग्ने इन्दोः सप्तमस्थाने कोऽपि शुभग्रहः भवेत् अथवा तत् स्थानं रिक्तं वा स्यात् इति स्पष्टार्थः।

**चन्द्रात् द्वितीयाष्टमस्थानेषु ग्रहाणां फालानि**

**इन्दोर्धनाष्टमगतौ क्रमशो विवाहे सौम्याशुभौ जनयुतो मृतिमेव वध्वाः।**

**क्रूरग्रहेऽष्टमगते विधवा भवेत्सा चन्द्रेङ्गनालिवृषसिंहगतेऽल्पपुत्रा॥**[21]

अर्थात् विवाहलग्ने चन्द्रात् द्वितीये शुभग्रहः अष्टमे च अशुभग्रहः यदि भवतः तर्हि तस्याः वध्वाः मरणकारिणौ तौ ग्रहौ भवतः।यदि तस्मान्नेव अष्टमे क्रूरग्रहः स्यात् तर्हि वरमरणं भवति । तस्मात् अष्टमशुद्धिः नितान्तं भवेदेव इति। चन्द्रः लग्नात् पञ्चमगः सन् कन्यायां वृश्चिके वृषभे सिंह वा यदि स्यात् सा वधूः अल्पपुत्रा भवति।

**सूर्यसङ्क्रमणदोषः**

**विषुवायनेषु परपूर्वमध्यमान्**

**दिवसांस्यजेदितरसङ्क्रमेषु।**

**घटिकास्तु षोडश शुभक्रिया विधौ**

**परतोऽपि पूर्वमपि सन्त्यजेत् बुधः॥**[22]

विषुवत् नाम मेषतुलासङ्क्रान्ती अयनं नाम कर्कमकरसङ्क्रान्ती एवं चतुसृषु विषुवायनाख्यासु सङ्क्रान्तिषु परपूर्वमध्यमान् गतागामिवर्तमानान्दिवसान्बुधः विवाहादि मङ्गलकार्यान् त्यजेत्।

**पङ्ग्वन्धकाणबधिराख्याः लग्नदोषाः**

**घस्रे तुलाली बधिरौ मृगाश्वौ रात्रौ च सिंहाजवृषाः दिवान्धाः।**

**कन्यानृयुक्कर्कटका निशान्धा दिने घटोऽन्त्यो निशि पङ्गुसंज्ञः॥**[23]

---

[20] मुहूर्तमाधवीये- 8.40

[21] मुहूर्तमाधवीये- 8.41

[22] मुहूर्तचिन्तामणौ- 6.79

[23] मुहूर्तचिन्तामणौ- 6.81

प्रत्येकदिने तुलवृश्चिकौ बधिरौ भवतः। मृगधनुषौ रात्रौ बधिरौ भवतः। सिंहाजवृषाः दिने अन्धाः भवन्ति। कन्यामुथुनकर्कटाः रात्र्यन्धाः भवन्ति। घटः दिने पङ्गुसंज्ञः भवति । मीनः च रौत्रौ पङ्गुसज्ञः भवति।

**विवाहे विहितनवांशाः**

**कार्मुकतौलिककन्या युग्मलवे झषगे वा।**

**यर्हि भवेदुपयामस्तर्हि सती खलु कन्या॥**[24]

धनुः तुला कन्या मिथुनं मीनः इत्येतेषु नवाम्शेषु यदि विवाहः विहितः तर्हि सा कन्या पतिव्रता भवति इति। तस्मात् एषु एव लग्ननवाम्शेषु विवाहो विधेयः।

**विहितनवांशेश्वपि निषेधः**

**अन्यनवांशे न च परिणेया काचन वर्गोत्तममिह हित्वा।**

**नो चरलग्ने चरलवयोगं तौलिमृगस्थे शशिभृति कुर्यात्॥**[25]

विहितेषु नवांशेषु अपि यथा मेषलग्ने धनुर्नवांशोऽन्तिमः इत्येवं विषये लग्नन्तिमनवांशे काचन कन्या न परिणेया। परन्तु वर्गोत्तममपि नवांशं हित्वा तत्र विवाहः उचित एव। तथा मिथुनलग्ने मिथुनांशः अन्तमः अपि वग्रोत्तमः इत्यतः शुभः ग्राह्यः।

**लग्नभङ्गयोगाः, लग्ने वर्ज्यग्रहाः**

**व्यये शनिः खेऽवनिजस्तृतीये चन्द्रखला न शस्ताः।**

**लग्नेट्कविग्लौश्च रिपौ मतौ ग्लौर्लग्नेट्शुभाराश्च मदे च सर्वे॥**[26]

यल्लग्नं निश्चितं तत्र व्येये द्वादशे यदि स्थितः शनिःतर्हि तल्लग्नं न शस्तम्। एवमेव दशमे यदि कुजः स्यात् तर्हि तल्लग्नं न शस्तम्। एवमेव लग्नात् तृतीये शुक्रः न शस्तः ।

एवमेव लग्ने चन्द्रःपापग्रहाः च न शस्ताः। तथा च लग्नस्थामी शुक्रःचन्द्रः च षष्ठस्थाने न शस्ताः। लग्ने कुजे सौम्यखगे च मृत्युः षष्टाष्टगे लग्नपतौ च मृत्युः इति वचनात् ।

**अष्टमवर्ज्यग्रहाः**

लग्नस्वामी शुभाः चन्द्रबुधगुरुशुक्राः आरो भौमः च एते अष्टमस्थाने न शस्ताः। यतः मासत्रयेण विधवां निधनस्थश्चन्द्रमाः कुरुते। मासत्रयेण कन्या निधनस्थे याति पञ्चत्वम्॥इति वचनात्।

**लग्नात् सप्तमशुद्धिविचारः**– लग्नपादि सर्वे सूर्यादयो ग्रहाः शुभाः अशुभाः वा सप्तमे न शस्ताः।

सर्वे जामित्रस्थाः विदधाति मरणम् इति वसिष्ठोक्तवचनात्।

पुनश्च काश्यपोऽपि –

सप्तमस्थानगाः सर्वे ग्रहाः कुर्वन्ति शाघ्रतः।

---

[24] मुहूर्तचिन्तामणौ– 6.84

[25] मुहूर्तचिन्तमणौ– 6.85

[26] मुहूर्तचिन्तामणौ–6.86

दम्पत्योर्मरणं यत्स्यादेकस्य च न संशयः।। इति अर्थात् अन्येषु स्थानेषु ग्रहाः समीचीनाः तत्र केषुचित्स्थानेषु शुभा एव केषुचिन्मध्यमाः एव इत्येतदपि वक्ष्यति। अतः अमुमर्थम् अति संक्षिप्य त्रिविक्रमेण निषिद्धस्थानान्येवोक्तानि – त्याज्या लग्नाब्धयो मन्दात्षष्ठे शुक्रेन्दुलग्नपाः।रन्ध्रे चन्द्रादय पञ्च सर्वेऽस्तेब्जगुरू समौ।। इति।

**सप्तमे गुरौ दोषफलम्**– यद्यपि गुरुः शुभग्रहः प्रदिष्टः तथापि गुरोः विवाहकालीन लग्नात्सप्तमे अशुत्वम् अस्त्येव। तदुच्यते – _कन्यास्तिस्रो जनयति सपत्न्यं चैव सप्तमे शशनि।
शीलचारित्रोपेतां करोति पत्युः कलत्रगो द्वेष्यम्।। गुरोरित्यनुवर्तते । तस्मात् गुरुः अपि लग्नात् सप्तमे न शोभते। तस्मात् सर्वथा सप्तमभावस्य शुद्धिः अपेक्षत एव।

**ग्रहाणां शुभफलस्थानानि-** तृतीयैकादशाष्टमस्थानेषु रविः केतुः तमः अर्कपुत्रः इतीमे ग्रहाः शस्ताः। चन्द्रः च द्वितीयः तृतीयः एकादशस्थः शुभः। गुरुबुधौ च सप्तमाष्टमद्वादशातिरिक्तस्थानेषु शस्तौ। अनयोः च उक्तस्थानेषु शुभफलं वदति वसिष्ठः –
प्रीतिर्बुद्धिः सगुणनिरतिर्बन्धुपूजा सुताप्तिः सद्वैपक्ष्यं तनयरहितं त्वन्यथा भतृनाशः।
धर्मो बुद्धिर्भवति धरणीलब्धिरित्येव बुद्धिः हानिःस्त्रीणां हिमकरसुते लग्नभादिसंस्थे।।
सितः च तृतीये षष्ठे सप्तमे अष्टमे द्वादशे च न शस्तः उक्तान्येषु च स्थानेषु शस्तः प्रोक्तः।
तदुक्तं श्लोकेन – भोगप्राप्तिं विविधविभवं स्वैरवृत्तिर्महत्वं द्युम्नाधिक्यं भवति निधनं सर्वनाशो वसुत्वम्। तथ्यप्रीतिर्बहुविधगुणाः सर्वसम्पत्समृद्धिरस्वं स्त्रीणामुशनसि तथा लग्नभावादि संस्थे।।

**लग्नभङ्गकर्तर्यादि दोषाणामपवादाः**

**पापौ कर्तरिकारिकौ रिपुगृहे नीचास्तगौ कर्तरी**
**दोषो नैव सितेऽरिनीचगृहगे तत्षष्टदोषोऽपि न।**
**भौमेस्ते रिपुनीचगे न हि भवेद्भौमोऽष्टमो दोषकृन्**
**नीचे नीचनवाशके शशिनि रिःफाष्टरि दोषोऽपि न।।**[27]

कर्तरिदोषो नाम यदा लग्नम् उभयथा क्रूरग्रहाभ्यां विद्धं भवति तदा कर्तरिदोषः भवति । तदपवादो अधुना अस्मात् श्लोकादुच्यते– यौ ग्रहौ क्रूरौ कर्तरिकारकौ रिपुगृहे स्थितौ नीचस्थितौ अस्तङ्गतौ वा कर्तरीदोषः नैव स्यात् ।तदाह वसिष्ठः –पापयोः कर्तरीकर्त्रोः शत्रुर्नीचगृहस्थयोः। यदा चास्तगयोर्वापि कर्तरी नैव दोषदा।।

**षष्टशुक्रापवादः**– यदा शुक्रः नीचगृहगः शत्रुगृहगः वा स्यात् तदा षष्टशुक्रदोषो न स्यात्।

**अष्टमभौमापवादः-** यदा भौमः कुजः अस्तङ्गतः नीचगः रिपुगृहगः वा स्यात् तदा अष्टमभौमदोषो न स्यात् ।

**षडष्टद्वादशस्थानचन्द्रापवादः**– यदा चन्द्रः नीचराशिगः नीचनवांशगः वा तदा षडष्टद्वादशस्थानचन्द्रापवादः भवति। अत्र च काश्यपोक्तिः नीचराशिगते चन्द्रे नीचांशकगतेऽपि वा। चन्द्रे षष्टारिरिःफस्थे दोषो नास्ति न संशयः।।

**अष्टदोषादि अनेकदोषापवादः**

[27] मुहूर्तचिन्तामणौ –6,88

**अब्दायनर्तुतिथिमासभपक्षदग्ध-**

**तिथ्यन्धकाणबधिराङ्गमुखाश्च दोषाः।**

**नश्यन्ति विद्गुरुसितेष्विह केन्द्रकोणे**

**तद्वच्च पापविधुयुक्तनवांशदोषः॥**[28]

अब्ददोषः अयनदोषः ऋतुदोषः तिथिदोषः रिक्तादिदोषः मासदोषः नक्षत्रदोषः पक्षदोषः अन्ध-काण-बधिर-अकालवृष्टिदोषाः ग्राहाणां वक्रास्तदोषाः सर्वे दूरीकृताः भविष्यन्ति यदा बुध-गुरु-शुक्राः केन्द्रत्रिकोणगाः भवन्ति ।

**उक्तानुक्तादोषाणां परिहारः**

**केन्द्रे कोणे जीव आये रवौ वा**

**लग्ने चन्द्रे वापि वर्गोत्तमे वा।**

**सर्वे दोषा नाशमायान्ति चन्द्रे**

**लाभे तद्वद्दुर्मुहूर्तादि दोषाः॥**[29]

लग्नात् केन्द्रे कोणे वा बृहस्पतिः यदा भवति तदा सर्वे दोषाः समाप्ताः भवन्ति। एवमेव चन्द्रस्य एकादशस्थितिः दुर्मुहूर्तदोषं नवांशकदोषं नाशयति।

**त्रिकोणे केन्द्रे वा मदनरहिते दोषशतकं**

**हरेत्सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः।**

**भवेदाये केन्द्रेऽङ्गप उत लवेशो यदि तदा**

**समूहं दोषाणां दहन इति तूलं शमयति॥**[30]

असप्तमकेन्द्रगः बुधः शतं दोषाणां परिहारः करोति। एवमेव असप्तमकेन्द्रगः शुक्रः द्विशतं दोषाणां परिहारं करोति। तथैव असप्तमकेन्द्रगः गुरुः लक्षपरिमितान् दोषान् परिहरति।

यथा अग्निः सर्वं हुतं भस्मीकरोति तथा लग्नेशः लग्ननवांशपतिः यदि एकादशे उत केन्द्रे भवति तर्हि सर्वान् दोषान् उकानुक्तान् परिहरति।

**क्षते सूर्यो जीवो वपुषि निधने दानवगुरुः**

**स एवान्यो योगो भवति दशमे शीतकिरणः।**

**स एवान्यो योगो भवसहजयोः सूर्यजकुजौ**

**शुभे जीवो लाभे दिनकरसुतो भ्रातरि कुजः॥**[31]

---

[28] मुहूर्तचिन्तामणौ – 6.89

[29] मुहूर्तचिन्तामणौ – 6.90

[30] मूहूर्तचूडामणौ – 6.91

[31] मुहूर्तमाधवे –8.45

षष्ठे सूर्यः लग्ने गुरुः निधने शुक्रः यदा भवन्ति तदा अयमेकः शुभप्रदः योगः भवति विवाहार्थम्। तद्वदेव यदि चन्द्रः दशमे भवति तर्हि अपि शुभदः योगः भवति। एवमेव एकादशे तृतीये क्रमेण सूर्यकुजौ यदि भवतः तर्हि अयमपि शुभदः योगः भवति । तद्वदेव यदि नवमे गुरुः लाभे शनिः तृतीये कुजः भवति तर्हि अयमेपि एकः शुभयोगः भवति ।

**विलग्ने वागीशो रिपुदशमयोर्मन्दमिहिरौ**

**रिपौ कश्चित्बुधभृगुसुतौ धर्मनिरतौ।**

**वसिष्ठोक्ता योगाः षडिह कथिताः श्लोकचरणैः**

**विवाहे जीवोक्तान्कतिचिदथ वक्ष्यामि शुभदान्॥**[32]

लग्ने गुरुः षष्टदशमयोः शनिसूर्यौ यदि भवन्ति तर्हि अयमपि एकः विवाहयोग्यः शुभयोगः। षष्ठे पापः कश्चित् ग्रहः एवमेव नवमे बुधशुक्रौ यदि भवतः तर्हि अयमपि विवाहयोग्यः शुभयोगः भवति । इतीमे वसिष्ठोक्ताः विवाहयोग्याः योगाः।

**नन्दो नाम बलान्विते शशिसुते लग्ने स्वराशिस्थिते**

**तद्वद्वागधिपेक्षिते भृगुसुते योगस्तुभाद्राह्वयः।**

**जीवाख्यस्तु तथाविधे सुरगुरौ शुक्रज्ञयोः कण्टके**

**वागीशेन्दुजयोः श्रीतैकगृहयोः जीमूतनामापरः॥**[33]

स्वस्थानस्थितः बलयुतः बुधः लग्ने यदा भवति तदा नन्दनामकः योगः भवति । शुक्रः स्वस्थानगः बलयुतः यदा लग्ने भवति तदा भद्राह्वयो नाम योगः भवति । गुरुः बलयुतः स्वक्षेत्रगः ज्ञशुक्रौ यदा केन्द्रगौ भवतः तदा जावाख्यः शुभयोगः भवति। ज्ञगुरू यदा एकराशौ लग्नगतौ भवतः तदा जीमूतनामकः शुभयोगः भवति।

**उपसंहारः**– एवमुक्तान् दोषान् योगान् परिशील्य दैवज्ञः विवाहदिनस्य निर्णयं कुर्यात्। अत एव सर्वत्र पञ्चाङ्गेषु संवत्सरे द्वित्रि विवाहयोग्याः मूहूर्ताः लभ्यन्ते । यतः ते सर्वे अपि मुहूर्ताः सर्वदोषरहिताः भवन्ति। एवमेव ते मुहुर्ताः योगयुक्ताः भवन्ति। यदि एतादृशदिने योगयुक्ते मुहूर्ते विवाहो स्यात् तर्हि सः विवाहः उत्तमः ग्राह्यः। सः विवाहः चिरं तिष्ठति समाजोपोगी च भविष्यति।

किन्तु इदानीन्तरकाले सर्वेऽपि जनाः मूहूर्तम् अदृष्ट्वा विवाहकार्यं कुर्वन्ति। येन बहुविधाः वेधाः दोषाः तं विवाहं भङ्गयन्ति। तेन च सः विवाहः बहुदीर्घकालं न तिष्ठति। तिष्ठति चेदपि भङ्गदोषेण बाधिताः जनाः दैवज्ञान् दैवातां च खलत्वेन दूषयन्तः ज्यौतिषशास्त्रं केवलं धनसम्पादनार्थमति लोके प्रसारयन्ति। यद्यपि दैवज्ञाः सर्वे सर्वविदं योगं दृष्ट्वा एव मुहूर्तनिर्णयं कुर्वन्ति किन्तु लोकानाम् आग्रहेण मुहूर्तं परिष्कृत्य वदन्ति यत्र योगाः नष्टप्रायाः भवन्ति। एवमेव सः मुहूर्तः केवलं नक्षत्रानुकूलः सप्तमशुद्धः च भवति। तेनैव तुष्टाः लोकाः अपि विवाहोत्सवं शुभ–शुभाकालम् अविदित्वा ऊढाः भविष्यन्ति। तेन च विवाहेण बाधिताः समाजस्य स्थितिं नाशयन्तः ज्यौतिषं शास्त्रं दूषयन्तः इतोभ्रष्टाः ततोभ्रष्टाः भवन्ति।

[32] मुहूर्तमाधवे – 8.46

[33] मुहूर्तमाधवे – 8.47

तस्मात् सर्वप्रयत्नेन इदं शास्त्रं सर्वैः प्रेयोऽभिलाशिभिः सम्यगनुष्टेयम्। अग्रम-संततिभ्य अपि इदं शास्त्रं सरम्यगध्याप्यम्। लोकेषु ज्यौतिषशास्त्रस्य उपरि श्राद्धा उत्पादनीया येन च लोकाः आस्तिकाः सन्तः शास्त्रम् उन्नयेयुः।

## सन्दर्भग्रन्थसूची


1. मुहूर्तचिन्तामणिः, खेमराज कृष्णदास, वेङ्गटेश्वर स्टीम् प्रेस, विक्रम-संवत् **2006**
2. मुहूर्तमार्तण्डः, केदारदत्त जोशी, मोतीलाल बनारसी दास, दिल्ली, वारणासी, **1993**
3. मुहूर्तमाधवी(कन्नडभाषापुस्तकम्), पण्डित वेङ्कटरमणशर्मा, गोकर्ण, गणेश-शङ्करजोशी, रथवीथी, गोकर्ण.
4. संस्कारप्रकाश, गीताप्रेस, गोरखपुर, प्रथम संस्करण, संवत् -**2072**
5. मुहूर्तचिन्तामणिः, तुकाराम जावजी, निर्णयसागरमुद्रणालय, शकसंवत् - **1829**
6. मुहूर्तचूडामणिः(शोधग्रन्थः), दयानन्द ए आर(शोधच्छात्रः), केन्द्रिय-संस्कृत-विश्वविद्यालयः, न्यू दिल्ली, (ग्रन्थसंपादनं प्रचलति)